सर्व्वथापि तेऽर्च्चिषमेवाभिसम्भवन्त्यर्च्चिरभिमानिनीं देवतामभिसम्भवन्ति प्रतिपद्यन्त इत्यर्थः । अर्च्चिषोऽर्च्चिर्देवताया अहरहरभिमानिनीं देवतामह्न आपूर्य्यमाणपक्षं शुक्लपक्षदेवतामापूर्य्यमाणपक्षान् षण्मासानुदङ्ङुत्तरां दिशमेति सविता तान्मासानुत्तरायणदेवतां, तेभ्यो मासेभ्यः संवत्सरं संवत्सरदेवतां ततः संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्तत्स्थांस्तान् पुरुषः कश्चिद्ब्रह्मलोकादेत्यअमानवो मानव्यां सृष्टौ भवो मानवो न मानवोऽमानवः स पुरुष एतान् ब्रह्म सत्यलोकस्थं गमयति गन्तृगन्तव्यगमयितृत्वव्यपदेशेभ्यः । सन्मात्रब्रह्मप्राप्तौ तदनुपपत्तेः । "ब्रह्मैव सन् ब्रह्माप्येतीति हि वक्तुं न्याय्यम् । सर्व्वभेदनिरासेन सन्मात्रप्रतिपत्तिं वच्यति । न चादिष्टो मार्गो गमनायोपतिष्ठते । "स एनमविदितो न भुनक्तीति" श्रुत्यन्तरात् । एष देवपथो देवैरर्च्चिरादिभिर्गमयितृत्वेनाधिकृतैरुपलक्षितः पन्था देवपथ उच्यते । ब्रह्म गन्तव्यं तेन चोपलक्षित इति ब्रह्मपथः । एतेन प्रतिपद्यमाना गच्छन्तो ब्रह्म इमं मानवं मनुसम्बन्धिनं मनोः सृष्टिलक्षणमावर्त्तं नावर्त्तन्ते । आवर्त्तन्तेऽस्मिन् जननमरणप्रबन्धचक्रारूढा घटीयन्त्रवत् पुनः पुनरित्यावर्त्तस्तं न प्रतिपद्यन्ते । नावर्त्तन्त इति द्विरुक्तिः सफलाया विद्यायाः परिसमाप्तिदर्शनार्था" भा० ।

यथा चैषामातिवाहिकत्वं तथा निरूपितम् शा० सू०भा० । "आतिवाहिकास्तल्लिङ्गात्" सू० । "तेष्वेवार्चिरादिषु संशयः किमेतानि मार्गचिह्नान्युत भोगभूमयोऽथ वा नेतारोगन्तॄणामिति । तत्र मार्गलक्षणभूता अर्चिरादय इति तावत् प्राप्तं तत्स्वरूपत्वादुपदेशस्य । यथा हि कश्चिल्लोको ग्रामं नगरं वा प्रतिष्ठासमानोऽनुशिष्यते गच्छेतस्त्वमग्नुं गिरिं ततोन्यग्रोधं ततोनदीं ततोग्रामं ततोनगरं वा प्राप्स्यसीति । एवमिहाप्यर्चिरर्चिषोऽहरह्न आपूर्य्यमाणपक्षमित्याह । अथ वा भोगभूमय एता इति प्राप्तम् । तथा हि लोकशब्देनाग्न्यादीननुबध्नाति अग्निलोकमागच्छतीत्यादि । लोकशब्दश्च प्राणिनां भोगायतनेषु भाष्यते मनुष्यलोकः पितृलोको देवलोक इति च । तथा च ब्राह्मणम् "अहोरात्रेषु लोकेषु सज्यन्त" इत्यादि । तस्मान्नातिवाहिका अर्चिरादयः । अचेतनत्वादपि तेषामातिवाहिकत्वानुपपत्तिः । चेतना हि लोके राजनियुक्ता पुरुषाः दुर्गेषु मार्गेष्वतिवाह्यानतिवाहयन्तीत्येवं प्राप्ते ब्रूमः । आतिवाहिका एवैते भवितुमर्हन्ति । कुतः तल्लिङ्गात् । तथा हि चन्द्रमसोविद्युतं तत्पुरुषोऽमानवः स एतान् ब्रह्म गमयतीति सिद्धवद्गमयितृत्वं दर्शयति । यावद्वचनं वाचनिकमितिन्यायात् । तद्वचनं तद्विषये एवोपक्षीणमिति चेन्न प्राप्तमानवत्वनिवृत्तिमात्रपरत्वाद्विशेषणस्य । यद्यर्चिरादिषु पुरुषा गमयितारः प्राप्तास्ते च मानवास्ततोयुक्तं तन्निवृत्त्यर्थं पुरुषविशेषणममानव इति । ननु लिङ्गमात्रमगमकं न्यायाभावात् । नैष दोषः । उभयव्यामोहात्तत्सिद्धेः । एतावदर्चिरादिमार्गगास्ते देहवियोगात् संपिण्डितकरणग्रामाइत्यस्वतन्त्राः । अर्च्चिरादीनामप्यचेतनत्वादस्वातन्त्र्यमित्यतोऽर्चिराद्यभिमानिनश्चेतना देवताविशेषा अतियात्रायां नियुक्ता इति गम्यते । लोकेऽपि हि मत्तमूर्च्छितादयः संपिण्डितकरणग्रामाः परप्रयुक्तवर्त्मानो भवन्ति । अनवस्थितत्वादप्यर्चिरादीनां न मार्गलक्षणत्वोपपत्तिः । न हि रात्रौ प्रेतस्याहःस्वरूपाभिसम्भव उपपद्यते । न च प्रतिपालनमस्तीत्युक्तमधस्तात् । ध्रुवत्वाद्देवतात्मनां नायं दोषो भवति । अर्चिरादिशब्दताचैषामर्चिराद्यभिमानादुपपद्यते । अर्चिषोऽहरित्यादि निर्देशस्त्वातिवाहिकत्वेऽपि न विरुध्यते । अर्चिषा हेतुनाहरभिसम्भवन्ति अह्ना हेतुनापूर्य्यमाणं पक्षमिति । तथा च लोके प्रसिद्धेष्वप्यातियात्रिकेष्वेवंजातोयक उपदेशो दृश्यते गच्छ त्वमितोबलवर्माणं ततोजयसिंहं ततः कृष्णगुप्तमिति । अपिचोपक्रमे तेऽर्चिषमभिसम्भवन्तीति सम्बन्धमात्रमुक्तं न सम्बन्धविशेषः कश्चित् । उपसंहारे तु "स एतान् ब्रह्म गमयतीति" सम्बन्धविशेषोऽतिवाह्यातिवाहकत्वलक्षण उक्तः तेन स एवोपक्रमेऽपीति निर्द्धार्य्यते । संपिण्डितकरणग्रामत्वादेव च गन्तॄणां न तत्र भोगसम्भवः । लोकशब्दस्तु अनुपभुञ्जानेष्वपि गन्तृषु गमयितुं शक्यते अन्येषां तल्लोकवासिनां भोगभूमित्वात् । अतोऽग्निस्वामिकं लोकं प्राप्तोऽग्निनाऽतिवाह्यते वायुस्वामिकलोकं प्राप्तो वायुनेति योजयितव्यम् । कथं पुनरातिवाहिकत्वपक्षे वरुणादिषु तत्सम्भवः विद्युतोह्यधिवरुणादय उपक्षिप्ताः । विद्युतस्त्वानन्तरमा ब्रह्मप्राप्तेरमानवस्यैव पुरुषस्य गमयितृत्वं श्रुतमित्यतउत्तरं पठति । "वैद्युतेनैव तच्छ्रुतेः" । ततो विद्युदभिसम्भवादूर्द्धं विद्युदनन्तरवर्त्तिनैवामानवेन पुरुषेण वरुणलोकादिष्वतिवाह्यमाना ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यम् । तान् वैद्युतान् पुरुषोऽमानवः स एतान् ब्रह्मलोकं गमयतीति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्तु